This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Acc. No. ~~3419~~ M.1715

Title - मन्युसूक्त.

Author - ?

Date - ?

Subject - वेद.

folio - 2

Xerox - 4.



श्रीगणेशाय नमः ॥ यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ॥
साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥ मन्युरिन्द्रो मन्युरेवा
स देवो मन्युर्होता वरुणो जातवेदाः ॥ मन्युं विश ईळते मानुषीर्याः पाहि नो
मन्यो तपसा सजोषाः ॥ अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि श
त्रून् ॥ अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥ त्वं हि
मन्योऽअभिभूत्योजाः स्वयंभूर्भामोऽअभिमातिषाहः ॥ विश्वचर्षणिः
सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ॥ अभागः सन्नप परेतो अ

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1715
Dist. Nagpur

स्मितव क्रत्वा तविषस्य प्रचेतः॥ तं त्वा मन्यो ऽअक्रतुर्जिहीळाहं स्वा
तनूर्बलदेयाय मेहि॥ अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनः सहुरे
विश्वधायः॥ मन्यो वज्रिन्नभि मामाववृत्स्व हनाव दस्यूंरुत बोध्या
पेः॥ अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जंघनाव भूरि॥ जुहोमि ते
धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव॥ १॥ त्वया मन्यो सरथमा
रुजंतो हर्षमाणासो धृषिता मरुत्वः॥ तिग्मेषव आयुधा संशिशाना
अभि प्रयंतु नरो अग्निरूपाः॥ अग्निरिव मन्यो त्विषितः सहस्व सेना १

नीर्नः सहुरे हूत एधि॥ हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि
मृधो नुदस्व॥ सहस्व मन्योऽ अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि
शत्रून्॥ उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम्॥ एको ब
हूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि॥ अकृत्तरुक्
त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे॥ विजेषकृदिन्द्रऽइवानव
ब्रवोऽस्माकं मन्योऽ अधिपा भवेह॥ प्रियं ते नाम सहुरे गृणीमसि
विद्मा तमुत्सं यत आबभूथ॥ आभूत्या सहजा वज्र सायक सहो

२ बिभर्ष्यभिभूत उत्तरम् ॥ क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥ संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ॥ भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयंताम् ॥ ७ ॥ इति मन्युसूक्तः ॥

KKSU LIBRARY
RAMTEK
441 106
M-1715
Dist. Nagpur

```
[OrderDescription]
,CREATED=05.10.20 11:36
,TRANSFERRED=2020/10/05 at 11:37:18
,PAGES=4
,TYPE=STD
,NAME=S0003838
,Book Name=M-1715-MANYUSUKAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,
```